करणानिबुधामहीभुजांप्राहुः येःखल्वमीनिपुणेनबुद्ध्यासनसंस्थास्सुसाधयन्तिहितम्॥ तच्छस्त्रमव
मेतद्यत्खलुदूरेपिसंस्थितंलक्ष्यम् विनिपातयतिनिमेषार्द्धेनत्वद्योपचातुर्यम्॥ अस्त्येवशस्त्रमस्त्रंसाध्या
द्युद्धमितिप्रतीतोनान् तृणगणनामेतिनवाततोविरोध्यंमहीपतिभिः॥ तस्मात्सूक्ष्मेक्षिकयावधार्य
चित्तंविचिन्त्यहितमेवच श्रोतव्यमिदंवचनंमहीपतीनांमनुक्तंयत्॥ सन्त्यरयोद्वैधैवचनित्यानित्य
प्रभेदसम्भिन्नाः आन्तरबाह्याश्चापियेमुख्यास्तत्रादिमानाहुः॥ यत्खलुनित्यारिपवोनहिबाह्यत्वेनक
रणजालेन यान्तिकदापिविनाशंतेषामजयेनकोपिजयः॥ धिक्तस्यवीरचर्यायोनित्यानान्तरान्स
मीपस्थान् हित्वारीन्विजिगीषतिबाह्यान्नित्यांश्चदूरस्थान्॥ दूरस्थशत्रुवधात्किन्नामजितंभवेन्मही
पतिना तस्माज्जितमित्यवधार्ययेनेत्थमुत्रजयलाभः॥ आसन्नशत्रुवधात्सर्वंविजितंभवेन्महीपति
ना विजितेष्वान्तरशत्रुषुत्रैलोक्यजयोपिहिनकिञ्चित्॥ नित्यान्तरशत्रुजयेमहीसुभूपस्यहस्तलग्ने
व देवीयमतोनहिनहिकदाचिदपियातिवैहत्यम्॥ तस्माद्विजयीराजाबुद्ध्यामात्येननिस्त्रुयंहत्वा वी

२•पे•

त्वान्तःकरणरिपून्नात्मवशे स्थापयेत्प्रथमम् ॥ एषु जितेषु सुरासुरा बाह्या ये शत्रवस्त एव जिताः न खलु जिता
न्तरशत्रुं बाह्यः प्रभवन्ति कदाचिदपि ॥ इति संस्थिते द्वितीयो विचारः चरितेन रहणीयेर्थे बाह्यारीणामपि
चैतद्देवमुख्यो विनाशनाय ॥ यत्खलु हृदयं व्यवहितं मन्तारिणमनागतं च रिपुसंजनम् लक्ष्यन्ते तस्याशेषस्याप्याशु
संहृतं मदिति तद्द्वये ॥ न करोति तत्करिवदनाराधनोस्य यदितं यदन्तराहत्या अहरम्बोलाञ्छितास्तयमथवावि
प्रमुखेन ॥ सम्यक्स्यानानेकमरणादूर्णपदानां यदास्त्रत्वम् सञ्जायते तदानीमत्यन्ताभावएव रिपुप
क्षैः ॥ कृत्वाचलितं चित्तं त्रिलोचने पार्वतीपतौ शम्भौ हेरम्बे मध्यं गमिते काचिन्नाशत्रुवर्गस्य ॥ यन्ना
मस्मृतिमात्राद्दूरात्पालूयते ह्यसङ्घातः तस्मिन्भगवति हेरम्बे का वार्ता शत्रुसङ्घस्य ॥ चित्तोपचारवि
धिना सम्यक्सम्पूजिते त्रिदिपुरुषे आकाशपुष्पतुलना सर्वे विघ्नाः प्रयास्यन्ति ॥ यथवा लक्ष्मीकान्ते
भुवनपतौ हेरम्बे समापन्ने कां कां न सिद्धिमचलां लभेत मर्त्यः सुदुर्लभाममरैः ॥ सम्यक्चिन्तिते तस्मिन्वि
निधाय चतुर्भुजे महापुरुषे हेतेरन्यस्य वार्ता को काचिन्नाशत्रुसङ्घस्य ॥ शान्तोसो मकलाञ्छिततेति

४

पद्मगासंस्थं तजुरोन्नतं पद्मासीनमुमाजानिवामममलं शार्दूलचर्माम्बरम् भस्मोद्धूलितविग्रहं फणिफणाव
द्धोर्ध्वकेशं स्तवैः सन्नद्धाञ्जलिभिः स्तुतं पशुपतिं ध्यायेत्कल्येऽम्बुदा ॥ लक्ष्मीपद्मकराङ्कितां शशिमुखीमा
लिङ्गपीताम्बरः शङ्खं चक्रवरं गदां सरसिजं दोर्भिर्दधानः स्थितो मायाप्राप्तिवशीकृताखिलजगद्भूति
स्वहस्ताच्चुविर्यः पातीदं मम पादपद्मकमलं ध्यायेद्धृदब्जे सदा ॥ इत्थं निशम्य वचनं सम्यक्तेऽस्य सदोहे
कम् मद्दत्वाऽयुनेवासौ राजानं तं व्यजिज्ञपत् ॥ श्रुतं स्वामिन्नल्पधियः त्वत्तुमहे स्विनः प्रभो त
थापि साधनार्थोभोः शिक्षितां शिक्षितां हर ॥ स्वयं च सत्कृत्य तां राजं स्थैर्यं नयगामिनी नयेनैव स
दाचर्यं नयतोऽजयमाचरेत् ॥ करोति सर्वमीशानः प्रीणितः सत्क्रियाभरैः नयापनययोः कर्त्ता सर्व
ज्ञः सर्वशक्तिमान् ॥ अथोवाच पुना राजा सत्यमुक्तं त्वयानघ सज्जोऽस्मि विधिवत्सम्यक्शिक्षितोऽस्मि च स
र्वशः ॥ सन्तोषश्चमो वित्तशिक्षिरस्तु सत्क्रियाप्रभृत् समाधिदृढधन्वा चलद्धृदयं धीमवाम्यहम् ॥ इयमे
व क्रियासाध्वी बालस्याकिं नु हीनया ईशप्रसादना मात्र सन्तोषे कार्यमर्पितम् ॥ वीक्ष्य तां समदेशानः

र॰प्र॰ स्वयमर्पितसत्क्रियः सर्वेश्वरः सर्वसाक्षी किंविधातेनिप्रीतिद ॥ अथ रात्रौ व्यतीतायां विभाते कल्य एव
च सेनयोरुभयोः सम्यग्व्यूहस्थितिरजायत ॥ तथा च ते द्वे मिलिते यथा मेने जनस्तदा मृत्युं विनान जा
5 त्वेते वियोगमुपयास्यतः ॥ अत्रान्तरे च सुमहदाश्चर्यमुदृष्टपूयत निर्गच्छन्त्याः स्थायिनोन्तःसेनाया
न बभूवत ॥ गङ्गेव सा महारावा निर्यान्ती दुर्गतस्तमः अच्छिन्नमूलदृष्टपूर्वस्थिर्वाङ्गान्प्रजापतेः ॥
प्रतिपक्षचमूः सापि सम्मुखागामिनी बहुः छिन्नमूलाभवन्नूर्णं हिमस्रावेव निम्नगा ॥ आयान्ती सा
समुद्भूतपताकाग्निशिखोज्वला कोलाहलसमाक्रान्ता दग्धप्रायेव वह्निभाः ॥ ईश्वरप्रीतिसैन्यं त
त्कुतोप्यागत्य सङ्गतम् दृष्टपूर्वं तस्य सुमहत्पताकाध्वजशोभितम् ॥ सम्पूर्णसाधनं रम्यशिखोपशो
त्वरशोभितम् सदस्सुज्वलिताकारं तेजसा समलङ्कृतम् ॥ यत्प्राप्य तद्द्विषोः सैन्यं ससाधनमपिद्रु
तम् पराभूय गतश्रीकं नष्टप्रायमभूत्क्षणात् ॥ अत्रापि सुमहदाश्चर्यं दृष्टं प्रीतं तत्र सङ्गतैः शूलभा इव
वातेन तत्क्षणान्नष्टाः समेऽपरे ॥ सा वेला पुरदारम्भः साक्षात्तदासीद्यतस्तदा लीनेषु केकिपुष्पेषु जजृम्भ

राजहंसकैः ॥ ध्वजच्छत्रपताकाश्रीभरितास्तस्य सैनिकाः विचक्रमुस्तमोध्वंसे स्वयं भातिरवेर्महः ॥
त्रिविष्टैन्यपालिपुण्याकलाङ्घिधिरश्मिपातेमहेन्द्रपौरुषलक्ष्ये शिथिलाजयश्रीः चञ्चुर्मामरमुरुघोररूपमु
च्चरश्मिं सत्यालिपद्ममलं प्रभुमाचकाङ्क्ष ॥ पुत्रैस्त्रियाविरहिते चलितुं प्रवृत्ते कोलाहलेन महताग
गजीविनेव राजा महोमहितमूर्त्तिरुदारधीलः स्वीकर्तुमेनमहता प्रयत्नाचकाङ्क्ष ॥ वाञ्छुत्येवं तथा
भूपकश्चिदागत्य मन्त्रधीः शिरश्छिन्देदवेक्षन्तीक्ष्णधारेण सत्वरम् ॥ तोहेति चवदन्त्येवशानितस्मिन्न
तुद्धृते आगत्य बहुभिस्तस्य पार्षीं खण्डपुः कृतम् ॥ न द्रष्टव्यं सम्पराये राजाज्ञालङ्घनं ध्रुवम् यथोचि
त्यं प्रचरन्तां नियती राजनेतरम् ॥ ईषणा सुणा प्रवास प्राप्तं प्रोद्यमानेनकेतनान् तमोरोधं सितेमूलान्त
मिस्त्रायां हन्तविधि ॥ समाधिहृष्टो लोकस्मिञ्जयघुष्टमहोदयैः अखिलानर्थविध्वस्तो राजभास्वा
न्वराजत ॥ पुष्पम् ॥ अस्माद्धृयमिदं सदास्तुमतिभिर्नो सौख्याकाप्यहोयासन्तोषतत्पस्विया पु
रणावागात्यै स्विभिः साधनैः नो सिद्धात्यययेत्र सनातनरत्नास्तेषां सदैव पुरः स्थानं द्वंप्रददातिके

२० पू:

6

वचकथासिद्धीर्द्ददातीति ॥ इत्येतदुक्तं विमलं महार्थं सनोहरत्नं परमार्थसिद्धौ हृदि स्थिते यत्र विभाति धी
रो विष्णुर्यथा कौस्तुभ उच्चकीर्त्तिः ॥ इति श्रीवीररत्नशेखरप्रिरचायां सनोहरत्नोत्सवसप्तमं द्वारम् ॥ ७ ॥
ओं श्रीगणेशाय नमः ॥ ओं अथाष्टमी द्वारविष्णुतां यत्रसिद्धिः पुरः स्थिता यो हि हिंसाचोपरोधाय ज्येष्ठश्रेष्ठानु
वर्तिनम् ॥ येयं सर्वमनोनुरञ्जनकरी सर्वार्थसन्धानरी नामुत्रापि न चिर्धृता बुधजनैर्बोध्यानरी संस्क्रिया
साधीसत्यप्रवृत्तिर्यया सुहृज्जनः सन्मानपात्रं शिरोभूषा सा तुपरोध इत्यृषिमनता वाक्कायमत्योचिती ॥
यथोक्तं तेन मनुनाय नैपुणी राजजेदपुण नन्यो वंश्यो परोधायं स्वस्व वर्णोश्रमक्रिया ॥ यासौ वर्णाश्रम
श्रेयः कल्पातो कल्पमञ्जरी कालफलति भव्यानाममृतं परमो मिति ॥ अथ तिस्त्राप्यमुमे वार्थैल
क्षयत्यमलात्मसु सद्धर्मप्रतिमासोयमुपरोध इतीरिणी ॥ यथाहि चनतां यातं जलं हिममिति
नीर्यते सद्धर्मचनतैवास्यमुपरोध इतीर्यते ॥ यथा वा चनतां दल्पयानकृष्ण इतीर्यते तथायं
चनतायातउपरोध इतीर्यते ॥ पुण्यकौटिल्यराहित्यं सत्त्वं स्फातिभिरीरितम् तत्त्वं धर्मेन चान्या

यः उपरोधाद्विनिश्कृतः ॥ प्रत्यक्षं वा परोक्षं वा यत्स्यात्त्वं धर्मगोचरम् सोपरोध इति प्रोक्तो मुनिभिः सूक्ष्म
दर्शिभिः ॥ धर्मो वृत्तेर्जननीभूतं नानाकारविराजितम् अनुवर्तनमित्युक्तं पर्यायेण परत्र च ॥ येयं व्याव
स्या सुहृत्वा भवस्य भववर्तिनी तस्याः परोयं यं प्राहुर्मूलमाकर इत्यपि ॥ सा च वस्या पिता पुत्र स्वा
मिभृत्यादि सङ्गता ध्रुवमेतत्पलैर्वा साहृतेस्याः शिथिला न किम् ॥ पुत्रानुरोधेन पिता पुत्रस्तदनुरो
धतः स्वामीभृत्यानुरोधेन भृत्यस्तदनुरोधतः ॥ समानेपि संस्थाने करनेत्रश्रवादिके किं कस्य च हि
प्रमाणगच्छेदनुरोधविनाकृतम् ॥ तस्मायाकाचिदत्रास्ति प्रेमभासारसुधाकरे संसारे प्राणरवेसाव
नुवर्तनबृंहितः ॥ नेच्छेदं यदि सञ्चलेत्कुभगतिर्लोके दुरालोकके नन्तग्रन्थिसुबद्धबन्धितनतुः स
नृभ्य कल्पीकृतः संसारः श्लथबन्धविश्लथवपुः सञ्जीर्णकल्पः स्त्रणान्नूनं न प्रयद्व स्थितिर्वर्तनव
ताप्युंकस्यचकस्यावहेत् ॥ दृष्टसन्धानतूपायारीतयो जगति स्थिताः अनुरोधेन ताः सर्वाः परीणप्रा
याः स्युरन्यथा ॥ किंचान्यद्भातियाप्येषा त्रयीलोकनिदर्शनम् साध्यनेनैव परथा न प्रायाभवे

२·भ्रो· द्रुरा ॥ तस्माद्ब्रह्मादिकीटानांस्थितिरेषासनातनी एतत्स्रोतोभ्रमितेर्नस्याःस्थितिरेवकृतोभवेत् ॥ इति
यःकोपिमतिमान्नत्यजत्यनुवर्त्तनम् सप्राप्यप्रियतांलोकेमनोभीष्टंचविंदति ॥ तथाचानुपुराणेषु
7 गाथागीतामहर्षिभिः प्रीतिमूलंदृढयतिविघाटयतिचाप्ययम् ॥ नमत्येमनुरोधेनसममस्तीहभू
तले ॥ लीलाविलसितादीनामित्युत्तमयावहम् यत्किंचिद्बलमस्तीहसोयंतन्मार्गरोधकः ॥
उत्तमाधमलोकानांसर्वेषामायदःस्मृतः श्रनुरोधस्तदन्नस्थैःसुखमुत्तममाप्यते ॥ तथान्यत्रा
पिचोक्तंतद्वैभवंनीतिपटुतो रम्यंहिवस्तुनकथंसर्वस्याहृत्यतामियात् ॥ यत्त्वद्योतप्रतापसंवलि
तयासच्छीलवल्ल्याहृष्टंमैत्र्यादीनिफलानियानिजनितान्यतःसुपक्वान्यहो तान्यास्वादसुगन्धा
मोदितमनोभृङ्गाणिसंसेव्यतांसाधूनामुपयान्तिप्रीत्यतिशय्याद्धन्योनुरोधःसवै ॥ यत्त्वद्योतप्र
तापहीनतरयासच्छीलवल्ल्याहृष्टंमैत्र्यादीनिफलानियानिजनितान्यत्तत्स्वपक्वान्यहो ता
न्यस्वादसुगन्धदूषितमनोभृङ्गाणिसंसेव्यतांसाधूनामुपयान्तिप्रीतिविलयाज्ज्याज्योनुरोधः

सकिम्॥ तथा चान्येपि विद्वांसोनुवर्त्तनकथामिमाम् गरीयसीं विदधते देन्तृक्ष्णादिभिरादरात्॥
सारं हि पुरुषचिन्तालोके परत्रेह च धर्मेण साध्यनेनाधिगन्तव्या तस्मादेष महाभरः॥ अभावे वस्तुप
रोधस्यापूर्वे च ग्रस्ते जगत्यथ सर्ववर्णाश्रमाः स्वस्वस्यान्यूनाधिकं कृतो भवेत्॥ अभावे तस्य हेम
न्तानर्थ उपजायते न किञ्चिद्विदिते लोके न च प्रायं जगद्भवेत्॥ सर्वथायं जवनिकाच्छाया जगति
राजते विज्ञाने चैष एवाहोच्छायाकरमनिवृत्तम्॥ उन्नीलत्वं च विनिश्चायं तन्नप्रायं जगद्भवेत् तम
स्य तापि तस्याधिकाकृतिर्जगतो भवेत्॥ इत्थं सत्यपि धीसारैरुपरोधनिरूपणम् अर्थप्राधान्यमा
श्रित्य विधेयं बोधसिद्धये॥ शब्दार्थं तद्गुणीभावे व्युत्पत्तिः साधिता त्रिधा विचारनिपुणैर्या सा यथा
विषयमिधीयते॥ तथाहि शब्दप्राधान्ये वेदशास्त्रं प्रवर्तते अर्थप्राधान्यतस्त्वापि पौराणीरीतिरिष्यते॥
शब्दार्थयोर्गुणीभावे साहित्यं नरिनर्त्तिच प्रभुमित्रावलासास्यात्तदेतत्सम्मितं त्रिभिः॥ आज्ञापदे
शस्तु स्निग्धवचोभिरुपदिष्टीरितम्॥ तत्रापीदं नीतितन्त्रं वाच्यप्राधान्यतो मतम् अतो न शब्दमात्रेण

२.पृ. अभिहितत्वं मनीषिभिः ॥ अर्थप्राधान्यमाश्रित्य तदेषोऽनेषडष्यते अनेषणषडाजानुचितावैवाच्यस
दुक्तिः ॥ अथवा ध्वनिमाश्रित्य विधौ च प्रतिषेधने प्रतिषेधे च विधिता भूषणं सूक्ष्मदर्शिनाम् ॥ न पुनः
४ मात्रमाश्रित्य व्यञ्जितत्वं मनीषिभिः मुख्यलाक्षणिकव्यङ्ग्यभेदादर्थस्त्रिधा मतः ॥ चतुर्थो वाक्यवि
द्भिस्तयोरर्थः सम्प्रतिपद्यते वाक्यार्थघटनेन तस्य हीणप्राप्तित्वदर्शनात् नस्यति सत्त्वतो तानो तात्पर्या
र्थावसानिकः ॥ अतस्त्वानुपरोधेऽपि हृद्यफलं दृश्यते क्वचित् उपरोधेऽपि कुफलमर्थमेवाहुर्यो गतिः ॥ हे
त्वाद्येन उदारसत्त्वमहिमा देवात्मकाऽप्यात्मनाविद्वान्यत्कृतबुद्धियोऽनुतपते किं कार्यमत्राधुना प्रा
प्यासौ लब्धुताभिरेव सुलवंप्रेत्याय ऊढाप्ययो भुक्त्वा पुण्यगतीः परः पुनरमतिर्योनिं श्विवामश्नुते ॥
कृत्वा पापमनर्थसार्थफलकं संगोप्य सर्वात्मना विद्वन्मान्यनुरोधकीलितगतिः दुर्वेदनस्तत्कृ
तः प्राप्यानर्थमनेकदुःखविषमं प्रत्यहतोऽनुचैवनास्ताऽवाप्य चयात नाजउमतिर्योनिं प्रयात्य
त्यकाम ॥ इति सञ्चिन्त्य मतिमान्यथाविषयमेव यः अनुरोधयतीहासौ सुखी प्रेत्यापि भद्रभाक् ॥

तथा चाभाणकोस्तीह लौकिकानां निदर्शनम् भ्रात्रा यमनुजः पूर्वैरस्थापितो रक्षणे दिवि ॥ विलायकाम
नां स्त्रीयां रक्षणीयमिदं त्वया नकथञ्चित्समाश्वासः कर्तव्यः कस्यचिच्छले ॥ श्रुत्वेत्याचिरं कालं स्वस्थि सो॰
तो मथुराछ्रुतिः अनुप्रासनसङ्गो भूद्यच्चितो सोऽत्र कर्मणः ॥ मुहूर्तेन सुमनप्रायं भुक्त्वा तत्क्षणमेव सः
प्रबुद्धो स्त्रीरक्षणार्थं द्रुतं तेन गीतं ज्ञातो नृपीन् ॥ सव्यापसव्यं तावीक्ष्य दृष्टे दृष्टेऽपसारितम् तेनापसरित
म्मन्यं प्राह मूढा सरस्वती ॥ कुतो ऽपसरसीत्यं त्वं दृष्ट्वा दिग्वासिवीक्षितः निपुण्य लज्जितः प्राह ना
हं नादेन्य धोमुखः ॥ कुत्र गच्छामि भवतः सर्वेद्रष्टुर्महात्मनः परं तु स्वात्मनात्मानं स्वागस्यक
र्द्धाम्यहम् ॥ इति सञ्जातमत्वात्तः प्रकाशितवृणस्पदः उवाच कथमेवाहं मुखं सन्दर्शयामि ते ॥
कथं पश्यामि चाचारानित्थं लच्चितकिल्बिषः सुमोदुत्तरेवासो यथापूर्वमितिश्रुतिः ॥ उक्तं चान्य
त्र यत्नापरजः यापि सुखेस्थितम् तद्वत्सुं सयितुं कश्चिन्तो हमः केश्चिदपद्यते ॥ तथा चत्रक्ष नपांपस्य
यल्लोके रजत्रागतम् अनुतापेन तत्सर्वं प्रोक्ष्यन्ते नत्सरक्षिणा ॥ तथा चान्यप्रकारेण दृष्टितः स्त्र

२·भ्रो· दृमदर्शिभिः ॥ उपरोधोयदातोजेपायेनाविष्कृतेपरैः तदाप्यसौस्वयंज्ञात्वातत्त्वर्योविनिवर्तते तस्मात्परो
परोधोपिस्वोपरोधइतीष्यते ॥ महतामेवनिसर्गोयज्ज्ञात्वाप्यखिलमेवतद्गुणैः कालेहमापणमपीपूर्णं
तंयेनसिद्ध्यतेतेषु ॥ अन्योपांशुरहस्येषुदृष्टान्तः प्रभुरीरितः यःहमापकइत्युक्तोडष्टाचाप्युपरोध
कः ॥ तस्माद्यःकोपिशक्तोमृदुलतरमनादैन्यबाधार्दितेत्रोबाहृसनीयशाम्भुंहतपरमपणस्तोष
यत्यादरेण सोपूर्वंपूरितोचाभिमतमपिवरंप्राप्यभीतुर्विधापितस्मान्नोरिक्तपाणिः कथमपिपरमा
त्मन्निवर्तेतजातु ॥ उपरोधेक्ष्यतेसद्भिर्नोपरोधस्यकेवलम् रहस्यातवितृप्तिस्तुस्वस्मिन्नन्तम
प्यहो ॥ तस्मात्तृतीयसिद्धान्तरीत्येदमनुवर्तनम् उभयोर्हितदंभाग्यैराप्यतेनदुरापकैः ॥ अन्य
थामपितद्रीत्यानानुवर्तनमप्यदः इलामुत्राभयायैवतस्मादेतंसमाश्रयेत् ॥ यस्त्वनुन्मीलितां
हस्तोलज्जयागूढचर्यया सोपांशुलीनदीनोपिनकदाचित्सुखीभवेत् ॥ अतीवकठिनाग
तिर्जगतिसेयमुच्चैश्चिरिपाशेनिपात्यवपुःकाश्यपोनिभृतमाप्नुयतेवृते अतीवसुतरांतथागति ८

रियं मनोज्ञादिनी परस्य यद्दसौद्धतं तमनन्तमव्ययधामप्रदः ॥ ज्ञमापलं तन्महत्तां यदर्थी प्राप्य सोऽक्रिया ।धिक्
त्तो न निवर्त्तेत नधिकारो यत्तत्त्वलङ्घनम् ॥ अत्रापि श्रूयते रम्या कथा पौराणिकी यया अर्थवादस्तवेऽपि स्यानि
श्चितो जायते विधिः ॥ मामोहनामा राजाभूच्छान्तो दान्तो विचक्षणः महीपालनसंसक्ते यस्मिन्मुमुदिरे प्र
जाः ॥ अतिरिक्तानुरोधः स्वभूव प्रथितो भुवि अगण्यं तस्य माहात्म्यं यदेकेनापि पप्रथे ॥ तथातिरिक्ते तेना
न्यथा तन्मूर्तिमवतन् मत्वा मुमुदिरे भृत्याः एवमेकस्यापि पूर्णता ॥ दयाक्षमाशमादीनां नूनमन्योन्यज
न्मता यदेकस्मिन्समुद्भूते जायते तु परसङ्गतिः ॥ तद्राज्ये कार्षिकः कश्चिद्ग्रामीणो ग्राम्यजीवनः हारा
म्बुपानसंहृष्टहृद्गुबद्धूमिवास्त्यपि ॥ तथा सहृद्गुस्तत्राभूद्यथास्य न बभूव ह दृग्गोचरेऽपि पानीयं स्वादुशी
तलनिर्मलम् ॥ नजानु लवणाम्भोधितीराभ्यासप्रविचारिणम् पथिकानां जीवितं यावच्चक्षुर्वैस्य मुकिं
कथम् ॥ अथास्यावसथे जातु दुर्भिक्षमभवन्महत् यथा निवसतां तत्र तन्नाराम्बु पिदुर्लभम् ॥ अन्न
पानात्यये कदाचित्तु तत्प्राणः स कार्षिकः निर्गत्यातोऽन्नपानार्थी दूरदेशोद्दरेऽह ॥ मार्गस्तं च प्राभ

२·पु·

नंवारि दर्शनात्प्रीतिमाप्य सः गत्वान्यत्तो मुहूर्त्तमुत्थे बिलं तत्र सद्दृष्टवान् ॥ तत्र शैवालनीलादिहीनपसा
र्ये समन्ततः दृष्ट्वान्धुं पूरितं तल्लं स्वादु निश्चित्य कायाप्यु परिषितः ॥ एतावत्कालपर्यन्तं यन्न दृष्टवं स तत्र दृष्ट्वा

10

विस्मित्य गत्वाग्रे सुत्याप्यतुलकं पपौ ॥ तत्स्वादु पूरितं सोगन्ध्युतं पीत्वेत्यमस्मरत् श्रान्तं नाके मृतमि
ति से दृं तदिति मे मतिः ॥ किं वा वासमस्ति तन्नाडी द्दमेवं वाममाधुना उपवासप्रसन्नेन नेषूननाकारिदं भुवि ॥ तद
ष्णं तु भुक्त्वा पुनान्त्यर्थं प्रेषितं मे मृतं ध्रुवम् इति चिन्त्य मामाति भवानां समकाय पूः भक्तकारुण्यवपूतः
किं किं न पुरतो नयेत् ॥ महाजनो चिंतमिदं स्वादु पूरितं निर्मलम् तत्पात्रममुना भृत्वा स्वस्वामिने नयेय
द्रुतम् ॥ तुष्टो मे सो सुपानेन पारितोषिकदानतः मृतप्रायस्य सुमतीराजाजीवं प्रदास्यति ॥ यद्वाप्यस्वा
न्तयोद्याहं पीडां दुर्भिक्षसम्भवाम् निवार्य सुखमासीनो भविष्यामि प्रभास्वदम् ॥ इति निश्चित्य पानी
यभृतां कृत्वा द्दतिं द्रुतम् स्वदेशसम्मुखीभूय चचाल मुदितो मनाक् ॥ अथान्तरे ध्वनः श्रुत्वा स राज गृहद्द
रतः कोलाहलं कथमिदं पप्रच्छ भयविह्वलः ॥ तत्क्षणं स्थित्वा च राजा सावधानीन्युक्तचेतनः कोसाविति

विवेकान्प्रयुक्तजनतामुखात् ॥ खलभूपूतनामासावाखेटार्थं बहिर्गतः इतिश्रुत्वास्य पद्वीसम्मुखंच
दधावसः ॥ प्राप्याथसम्मुखंतेनस्यकृत्यबन्धनपूर्वकम् बाहुस्तावुपनीयाग्रीवांदंचक्रे समाहितः ॥ सो
चिंतंतन्निशम्यासौमामोहापरनामकः सम्मुखीभूयपप्रच्छतंतः किमितिचाग्रतः पृष्टः प्रणम्य सोवा
दीद्दूरादागतोस्म्यहम् दुर्भिक्षपीडितास्तत्रप्रजाव्याकुलिताभृश्याः ॥ तन्नाः सङ्कुचिताङ्गाश्चकाचिद्रूपी
काविधिर्वपुषान् भवान्क्वेति पृष्टः संस्वदन्निकमहंगतः ॥ भवद्भृत्यान्समुद्दिश्यविधिनात्वंमयेहितः
अहोभाग्यमहोभाग्यमहोभाग्यंमहत्फलम् ॥ समुल्लसतिमेभाग्यंफलितंमेसुकर्मणा यद्राजादुर्लभा
लोकः स्वयंपथिमयेक्षितः ॥ यद्भृत्यसान्त्वनांनानाराजादृग्गोचरेभवत् महाभाग्यंमहाभाग्यंमहाभा
ग्यंपुनःपुनः ॥ नसर्वथानिराकार्यः पूर्णपारीर्थतोस्म्यहम् श्रानीयोपाधिमीप्सार्थेमागतोस्मिनरे
वलः ॥ तादृशंचोपधानंमेयत्स्वहस्तप्रान्तमर्थितः श्रवलम्बन्तश्रत्यर्थंमार्थिनाम्नैवसङ्गताः ॥ नकेनापी
हरणप्राप्यंस्मात्यदिचजानुचित् भवादृशानांभाग्येनमयालब्धंनचान्यथा ॥ निशम्यैतद्गिरंसोथ

२.पृ. विस्मित्योवाच किंपुनः तदानयद्रूतं चेति मुदितोऽग्रे सतस्थिवान् ॥ पृष्ठलग्नां पुरस्कृत्य हृतिं स्वोचितवल्गित
म् विधायोवाच खलपूः राद्दस्स्वामितमादरात् ॥ पुरतस्तां निधायास्य ऊर्ध्वश्रीर्षाग्रजः कृतैः चलाचलो निर्ज
गाम पृष्ठेन प्रवदन्मुदा ॥ अमृतमनृतं यद्वेदराजन्स्मृतं भुवि केवलं न च न च कदाचिद्दृष्टं यत्न चापि गलधृत
म् तदिदमधुना दृष्टपूर्वं यत्तेवने त्वामिपूरितं किमपि मधुरास्वादं तस्माद्व्यापि च फाणितात् ॥ प्राकारसर
वेदमथवामृतसोदरः नदृष्टपीतोयत्र सत्त्वस्वप्रत्ययगोचरो ॥ श्रुत्वेति खलपूः राजा वाक्यं पार्श्वस्थितं
दूतम् प्राप्रान्सामृबुभृतां धारीमेकामानयमाचिरम् ॥ तदानीं तां करे धृत्वा दृष्ट्वा भ्रष्टाभ मम्बुतत् दूषि
तं दृष्ट्वा निगन्धेऽस्या पूरासार्थं तुलकं पपौ ॥ अन्नरुभूतबीभत्सो वदितिव्याससौम्यदर्शनः धियातदा प्रायं
सर्वं स्वयं धीमान जीगणत् ॥ ज्ञात्वाप्यनेनतस्यासावनुरोधोऽनुपालितः दृष्टमायणं दिमदृतामनु
रोधाद्धि भूषणम् ॥ अनुरोधविपूर्णो यं तुमापणमितीरितम् सामान्यविषये सोचविशिष्टविषये च
तत् ॥ दृष्टेद्वाधारभेदेन सामान्यस्यापि वस्तुनः विपूर्णो भूति पूजाभ्यां यथा वै भृत्यविप्रयोः ॥

यत्किञ्चिद्दीयते राज्ञा विप्रायाचोदितस्य सा भृत्यायवेतनं वस्तुगतिर्लोके ऽदितादृशी ॥ इतिमत्वा तु रे
धस्योत्वं सतनं नैव कार्हिचित् विधेयं तस्य विधूषा सर्वेषामयमेव हि ॥ स्वयं विचिन्त्याथ स तं प्रोवाच वद
तां वरः श्रूयेतत्यमिदं स्वाउजीवनं बध्यतां हृतो ॥ नास्य सर्वत्वया पात्रं विधेया रक्ष्यतां हृठम् नेत्र
भूहेपण भ्यांच नगुत्का भन्त्यमनत्पगात् ॥ इमां पारींमत्पुरतो विकीर्याभुं हृतिं तथा श्रादायास्माच्च
कस्मिंश्चित्कोणे गूढं निवेशय ॥ कार्याच रक्ष्या स्या भवता गूढं स्याच्च यथा न हि कश्चिद्रन्यो
विजानीयाद्वस्तु रक्ष्यं च यत्नतः ॥ इत्यमाकारमाज्ञाय तमाह स्म पुनर्नेयी स बूपधात्वयासाधु
नवानीतावद्राधुना ॥ काकाङ्क्षा ते किमर्थं ते निपुणाङ्कं कथय याधुना निपुणम्या श्रुवासितां वाणीमहा
कीर्तिर्महौजसः सोऽवाच महाराज सर्वे दुर्भिक्ष पीडिताः भवामोऽत्र परं देवः प्रमाणं किं वदामि ते ॥
उपवासमहादुःखक्लिष्टा मे स्वजना गृहे यद्याऽत्र न राजन्नेदिमो न्यान विप्रोषिताः ॥ इत्या
प्येयोधधीं तेषा दायागतर् हास्मिभोः तथाऽत्र रघु राजेन्द्र यथा जीवाम हे वयम् ॥ श्रीतुं भृत्या

२·भू· न्मश्राज्ञाप्यसुवर्णपूजमापुरुभोः आनयध्रुमयानीतंगृह्यताममितिसोवदत्॥ आज्ञेयगच्छेत्यु
क्तोसौगृहीत्वातज्जगाम ह दृष्ट्वायात्समतीतेत्रभृत्यः कोपिव्यजिज्ञपत्॥ भद्रंतेस्तुमहाराजपृ
च्छाम्यभयमस्तुमे पृच्छेत्युक्तोब्रवीतिस्मतवपश्युभयोत्तरम्॥ किंकारणेकाचिकित्साकारणमा
त्रमपित्वया नदत्तमस्मात्त्यानीयादनुजीविभ्यइत्यहो॥ सुवर्णमर्धमार्गेसोप्राहयित्वावि
सर्जितः नविद्मः किमपीत्याथोराजनीतिर्गरीयसी॥ इत्युक्तोसौस्मितगिराहस्मदेगच्छद्भूषित
म् विवर्णस्वादराहितं तदभ्यस्ताद्गुणाधिकम्॥ मत्वाचोपजहारासौनदोषोस्यकथञ्चन ग्राम्य
स्यसत्तताभ्यस्तहारस्यापिनिराहृतेः॥ भवन्तोयद्यपगमितंपिबेयुस्तद्दुरापायाः आक्रुश्यैनं
दुरालापैर्निरस्येयुर्नसंशयः॥ निरस्तोकिञ्चनोलज्जानतवक्त्रोयदाव्रजेत् तदापराधसाक्षी
त्वमनुरोधस्यमेभवेत्॥ अनुरोधसमंलोकेकिञ्चनापिनविद्यते भद्रस्ययोगतिः सास्यनरके
पतिताभवेत्॥ सापिमोर्गेमयानीतचेत्प्रषितायंतदापुरः गत्वाविलोकयनयसुगुणस्त्वंपानमा १२

तः ॥ अस्यानीता प्रभुमान्यत्वनाप्तोल्लज्जा च यास्त्वयम् विदीर्णहृदयं कुर्यान्निर्वृतिस्तस्य कामभेव
त् ॥ विचिन्त्येत्थं मया स्वामिमार्गेयं प्रेषितोऽपि यः येरङ्गितज्ञानफलाः प्रभुत्वं पर्य्यालनम् ॥
रहितोऽस्यानुरोधायं मत्समीपागतोऽप्यसौ ममानुरोधसाहाय्यं स्वीचकार स्वकर्मणः ॥ अन्यै
चिन्त्यं बाढं न दृष्टमित्थं प्रेत्यापि कलुषं यदेतद्धावितेद्दलितमनसां पङ्कलिकाम् मुखेनैत्थं य
प्रयत्नयमलनयनाप्रभुमतयो विलज्जानि पूगाण्ह्रस्वकृत्य चरितं दुर्गति विधेः ॥ तस्मात्सद्भावपु
ष्टं कविभिः खलमलं ध्येयमेतत्स देवं माहात्म्यं तन्निकामं जगति प्रविततं राजतेऽनन्तसौख्यम्
कश्चित्त्वर्थी यदाप्तो भवति सुकृतिनां द्वारि लब्धानुरोधो दृष्टुस्तुष्टो मलापूर्णविमलवकजमुखोरित्ते
पाणिर्व्रजेत ॥ एतत्तन्नितरां महाजनगृहेनौचित्यपङ्काङ्कितं यद्द्वार्यर्थिजनालुब्धन्नविरतं संभ
ग्नव्रीडापूयः रुष्टोनष्टमतिर्विवर्णवदनोभ्रूपयङ्गतिर्दुःखितः प्रत्यायाति विदीर्णहृत्सरसि
जेवाघातसंरुद्धहृत्सरणः ॥ इति राजमुखोद्गीतोऽपि पीत्वा तेवाक्सुधां मुदा पूर्णः स राजा च तदा

२॰ भू॰ अवतारं प्रचक्रिरे ॥ ॥ अथान्योऽपि प्रकारोऽस्य कीर्त्यते विमलप्रभायाः पुरुभाग्यायेन यान्तीह परत्र च परं श
जितम् ॥ अचिन्त्यावस्तुवैचित्रीति पातुर्यतज्जन्मने गुणश्च निर्गुणश्चेत्थं नियतिर्यत्र मज्जति ॥ स्वस्ववर्णाश्रमा
13 चारपालनं धर्म उत्तमः विहितो बुद्धिसाहाय्ये एतद्वीयं स्थापितो मतः ॥ सोऽपि यस्यानुरोधेन त्यक्तः श्ला
घ्यापदं नृणाम् अपत्रपाभयाल्लोको जहातीमं सुपूजितः ॥ तथा चाभाणको स्तीह हृदयावर्जकः
सताम् मिष्टं हि वचनं कस्य हृदये न स्थितिं भजेत् ॥ यदपि च धर्म्यं लोकविरुद्धं नाचरणीयं नाचर
णीयम् यदपि च निन्द्यं लोकसुसमृद्धं तत्करणीयं तत्करणीयम् ॥ इत्थं यापत्रपा लोके गुण इत्यभिधीयते
तस्माद्विनयनामासावनुरोधो गुणो भवेत् ॥ एषा गुणाद्गुणोत्पत्तिरस्तु पादमुनेर्मते विरुद्धापि स्वयं भाता
कार्यान्यजेत्स्वलिङ्गतः ॥ प्रमाणरहिता लोके कथं न प्रत्ययावहा किं प्रमाणं विमृष्टं हि दृष्टमा
नदृष्टीकृते ॥ तथाऽस्त्याख्यायिका चास्ति दृष्टान्तो दार्ढ्यसिद्धये यस्यां श्रुतायां विमलं वस्तिवदं क
स्य नामुदे ॥ अभूद्राजा नवपुरो विनयावसथो भुवि अतीरञ्जितप्रजो नयो येन वस्तुन्धरा ॥ नयेच वि

नयेल्लोकरञ्जने मुदिताः प्रजाः गुरुं शूद्रं मनुं चापि यमाहुर्धर्मपालिताः ॥ अनुरोधपुरस्कारविन
याहृतमानसः सततं ज्ञानतः पुरे जातु नैव रेमे वरोरुभिः यत्रेरामञ्जरीहस्तिकाप्रोन्मीलितउज्वला ॥ क
थं मुकुलनेत्रेस्याः प्रेतमालेरमेरहः इति मत्वा स विनयी नेरमे स्ववरोरुभिः ॥ कथं न विनयादस्मात्त
स्य धर्मरतिः परा ॥ नवशरवतोहृष्ट्वासेयं प्रहृष्टिरिहेहृष्टी विदितपरमार्थायामाहुः सुशील्यानुवर्तन
म् परमगहना धर्मस्याहो गतिः परमाप्यहो न खलु सुगमा धर्म्या रीतिर्जडैः पिशितेक्षणैः ॥ वद
न्ति तं च राजानं वक्ष्यदाहोचितं परम् येन सा रहिता कीर्तिराकल्पं नाकदायिनी ॥ तदिदानीं सदाचार
शालिनो यमस्तान्वयाः पालयन्त्यनुहृत्तिं तां तेषां गतिरनुत्तमा ॥ अनुरोधमृजापूर्वं यच्चित्तं स्यात्त्वि
रन्तरम् तद्ब्रह्मणो भगवतः प्रकाशानन्ददर्पणम् ॥ याहृक्त्रिरनुरोधासौ न हृगान्ध्यतनोवरम् आन्ध्य
दोषं प्रकाशिन्यां तस्यां दोषो ह्यसङ्गतिः ॥ अनुरोधलक्षणमिदं रत्नं विमलं निरस्ततिमिरौघम् निशि
तं मया मनीषिभिरलङ्कृतं हृदि प्रकाशते नितराम् ॥ इति श्रीवीररत्नप्रोद्भवप्रशिक्षायामनुरोधल

२·मू· कारणमष्टमंद्वारम् ॥ श्रीगणेशाय नमः ॥ अथातो नवमंद्वारंनवमंकीर्त्यते बुधाः नवमंसौभगंयत्र
जायते विघ्नतांत्वरेण तु ॥ बाह्यान्तरं पुनश्चित्तात्स्वयं यत्तु द्विधा पुराधुना तदेव लक्षणेनात्र दृष्टान्तेन च वर्ण्य
ते ॥ आपातरमणीयेषु विषयेषु विहृत्यास्मृता तत्रैव सम्मुखीभूय यदकार्यं प्रवर्त्यते धिया सम्य
ग्विचार्याथ तद्धि शमोऽस्ति यः परम् तच्चोक्तं द्विविधं प्रोक्तं बाह्यान्तरविभेदतः ॥ अहन्त्वं निष्कलात्स्वया
द्यपदं एव यामन्नत्वाधिरूढाविपलां चेतना उरुतत्त्वयोर्वेलनाम् अवाच्यपदमन्वितामिरूपरं त्वचान
र्थदं बुधैर्निगदितात्ततो विरक्तिरेव प्रोक्तं द्विधा ॥ पापयानेसमारूढयोः स्वस्यानात्मेषणादि मधुम
न्नत्यान्येषामाक्रान्तिस्तदप्रोक्तम् ॥ मनोदहनविभेदेन तद्द्विधा प्रथमं विदुः तत्पल्लवानामान
न्द्यादनन्तं तद्धि जायते ॥ परदारावमर्षस्य प्राधान्येन तदीरितम् परदारावमर्षं च स्थितेनान्नं नेत्वसौ
क्रिया दुष्टायां न प्रजा बीज पुमान्न लितचेतनः ॥ तथाऽन्ति तत्र नास्त्येव गम्यागम्यविवेचनम् अग
म्याः प्रायशो लोके रम्यास्तु सुलभा अपि ॥ अगम्यागमनेनष्टा मन्त्रपूतास्तु याः क्रियाः नष्टास्तु

तास्तु सत्वस्थादेवताः प्रचलन्ति च बाधिर्यं तु श्रुतान्धत्वं मूकता कौण्यपङ्गुताः इत्यादयो दोषग
णा देवताचलनादितः ॥ तासां प्रचलने भक्ष्याभक्ष्यभेदोऽपि न प्रयाति विनाशोऽस्य तु ततो भीतिर्भये भीतिर
नर्थदा ॥ अभीतोऽस्य स्ववर्णस्याः सत्क्रियास्त्यज्यते नृभिः तत्त्यागे तु तत एवास्य प्रायश्चित्तविधिर्भवेत् ॥
अज्ञातपापपक्षे तु प्रायश्चित्तो विधीयते तदभावे ध्रुवा तेषामवाच्या गतिरीरिता ॥ अनेका यातना भु
क्त्वा ततः पापानुसारतः कीटादियोनिसम्प्राप्तौ स्थावरी गतिरन्ततः ॥ यद्यपि ज्ञातपापानां प्राय
श्चित्तं श्रुतीरितम् तथापि तत्र लघुता गुरुता च गरीयसी ॥ अतिनिर्बन्धतो शौचप्रक्रियायां न जातु चि
त् शोधनं नहि सूत्रेरा विशुद्धं तु ज्ञापितं मतम् ॥ तस्माद्धियानर्थं समुद्भ्रमेनं विचार्य तत्त्वेन विशुद्धभावः
सङ्कल्पमात्रादपि तस्य चित्ताद्वार्यो बुधैर्नूर्ध्वपदोत्कचित्तैः ॥ इति ज्ञात्वान्तरतया शौचं यद्द्विविधं म
तम् तत्रान्तरं मनःशौचं शुद्धसङ्कल्परघ्युते ॥ तत्रानुबन्धिता मित्क्रमैत्र्यादीनां स्वभावतः ॥ उ
दिते शुद्धसंकल्पे मैत्र्यादय उपस्थिताः नहि भानावभ्युदिते द्युतीनां यत्नसाध्यता ॥ यो यं ज्ञा

२·पू·

15

न क्रियाहेतुरिन्द्रियाख्योगणोमतः तस्यापि तदधीनत्वान्न पृथक्कृतिरिष्यते ॥ विमूढस्य क्रियेशादिप्रवृ
त्तीनां क्रिकागतिः न हि तद्भिन्नया याऽहं क्रिया कुत्रापि दृश्यते ॥ अनुसारेण नासाग्र दृश्यते स्य क्रिया क्वचि
त् तदप्यक्षकषायत्वं तस्मान्मुख्यास्ति तत्क्रिया ॥ तस्मादनर्थमुत्सृज्य यासौ प्रातिस्विकी क्रिया विमलेन्द्रिय
वर्गस्य तच्छौचमिति कीर्तितम् ॥ यथा वाचः सत्यवाक्त्वं जिह्वाया भक्ष्यभक्ष्यता तथेति स्थालीपुलाकन्याय
माश्रित्य चिन्त्यताम् ॥ तच्चेदं द्विविधं शौचं स्वतः सच्छीलशालिनाम् निसर्गजं ततश्चोपदेशसंस्कृतिरी
ष्यते ॥ तथा चात्र पुराणेषु द्विपदं वर्णितं जगत् दैवासुरी प्राणिनां नित्यौ फलदौ कारणैश्चितम् ॥ एको
दैवैर्दैवसम्पदा ...यायत्तमाश्रयात् सच्छास्त्रसत्क्रियासङ्गाद्दैवीसम्पत्तिरिष्यते ॥ तत्र सच्छास्त्रस
ङ्गः तत्सत्त्वहृतेः प्रकर्षतः क्रमेण कमतो वापि पुमान्स्यान्मुक्तिभाजनम् ॥ यस्यासौ प्रतिभाती शास्त्र
दत्तुग्रहलेशतः करामलकवत्तस्य न काचिद्द्हतेनेष्यते ॥ अभ्यासयोगादिनायस्य संयमस्थैर्यतोपि वा
प्रतिभाति महेशानस्तस्यासौ वर्तते नेष्यते ॥ इत्यप्रपद्यागतिः सत्यासत्त्वाक्रमणरूपिणी न कदाचि

द्विपर्येति भातस्य ऊर्जस्वा श्रुतिः ॥ इयं सा सात्विकी वृत्तिर्दैवसम्पत्तिरग्रिमा अस्यास्त्वपरा वृत्तिः सत्त्व
लक्ष्मा क्रियाश्रया ॥ सत्कर्मणां प्रसङ्गेन सत्त्वाक्रान्ता रजोमयी कृच्छ्रादिक्रिययोपेता दैवेव शुभदायिका ॥
कर्मणां तारतम्येन परावरगतिप्रदा रजः सत्त्वसमायुक्ता सर्वेषां लक्रियानुगम् ॥ वेदानुशासन
शिरवा येनासौ गिरसा धृता जनतायां स्वयं सिद्धुं वरत्वं तस्य सिद्धये ॥ अस्याप्यपरया सन्निरस्तैरेण
सुरीचया सम्पद्यत्र समानत्वं पशुभिस्तद्वृत्तिः पुनः ॥ रजः प्राधान्यमाश्रित्य सत्त्वाधर्येणाग
तिः तमोनुसारिणी सेयमासुरी सम्पदिष्यते ॥ वेदानुशासनशिरवा येनासौ पद्गताहृता स्वतन्त्र
चारी न कुत्र मसौ भ्रष्टो ऽजत्यधः ॥ पानाशनसमुल्लासे निद्रालस्यप्रमादतः सत्क्रियानिवृत्तो न
स्यात्कर्येपशुरबुद्धिमान् ॥ तस्मादत्र सुबुद्धिर्वै भवभयाद्यद्विधा संस्थिते मार्गे बुद्धिपरिष्कृतैरत्न
दिनं गम्यं शुभावाप्तये योयं मार्गोऽथापरो मलदूषितस्तस्मात्तथा दूरतो गम्यं येन तदृष्टाश्रयाः कविम
लाः स्पृष्टा भवेयुर्न हि ॥ स्पृष्टो सौ विधिना पुमान्ननु महाभाराय संक्लान्वितो येनेयं वचनाद्विलो

र·मू·

16

कविषयासम्पूर्यतेकर्मणा तस्मादेषधियंनिधायविषदांकुर्यात्तथासङ्गतिंस्नाच्चयांयातियथागतिंस्वप
रेतोध्रुवुद्धेरगण्यागतिः॥ तस्माद्दाद्येषष्ठेत्र्यासोनिष्ठत्र्याचद्वितीयतः कृतकृत्योभवेद्धीरः कृतकृत्यः
प्रमान्नुमान्॥तथाचात्रोपदिष्टंचमुनिभिर्मनुजंप्रति भोर्द्ध्यादृर्यसिद्धिस्तेयथेच्छसितथाजय॥य
थेच्छातेमनुद्भूतापात्रेस्यांदेवसम्पदः पश्चात्स्वादान्निवर्तेस्त्वंविचारपरमोभव॥ गर्धोमनसिचेद्भु
दुःविचार्येचपुनःपुनः विचारोनेकपालोकेहिंसाहिंसादिनास्पृटम्॥ तथाचवर्त्यतेनयथापुण्य
पुण्यादिफलन्यता इत्थंविचरतस्तेस्यान्त्वतनवपराभवः॥ यदाचातिबलीकामविकारोपिसमाप
तेत् तस्यांमोक्षान्नवेलायांस्मार्योधर्मास्यहानये॥ तेयक्षाभवत्पूर्वस्यावरसौख्यंत्रिकालज
म् कीर्तिश्चविपुलाकल्यंक्षेपयेच्चन्नुमण्डलम्॥ यदेवसर्वथाकामोबलीप्रीतिंनदेवहि हृषीक
वल्लंसाम्मुखाच्यन्यानीयमनोजय॥ यथामोक्षान्मयवस्त्यन्तोपोचपङ्कप्रदूषितः क्लिन्न
श्चनभवेद्धेरतथास्यापरयत्नतः॥ तदेतद्विधिप्रास्त्राशाठलद्धंनविधानतः वर्तनायदितेसम्य

१६

कस्य सीदति न चान्यथा ॥ यद्यपि चाणमात्रेण लब्धं नैस्याः स्वबुद्धितः वर्तनात्तदनर्थं स्याद्दाकल्यमि
त्ति निश्चितं ॥ सर्वज्ञः सर्वकर्त्ता च सर्वप्राप्तिर्महेश्वरः तन्निश्चयो यद्विहितं सर्वेष्टार्थप्रसाधकम् ॥ आप
त्तनिश्चयः सोयं यत्स्वबुद्ध्या विनिश्चयः निश्चयाभासनस्तस्मादनर्थः स्यात्पदे पदे ॥ यान्यन्यानि च
लोकेस्मिन्व्यसनानि सुबुद्धिभिः कथितानि सदा तेषु दृष्ट्रोपः परमं पतनम् ॥ इति यः कोपि संप्रहृष्टो
मनोवाक्कायकर्मभिः जन्तुष्वेमन्त्र सन्तीति कपाटोद्घाटनं भवेत् ॥ सदोत्साही जयी नित्यं प्रसन्न
हृदयः सदा सामान्यतामवाप्येरूपरत्नत्वमाप्नुयात् ॥ सर्वसाधारणत्वेस्य कर्मणः सत्यपीदृशे
विप्रेषेणात्र राजानो धिकारपदभागिनः ॥ सोपि प्राप्याधिकृतो राजा यदीह कुशीलभाजनम् दुर्नयाद्विप्र
भं तस्य राज्यसीम्नोपगच्छति ॥ यत्रासौ नृपतिस्तत्रापि वसेत्तत्र कदाचन न बालस्यादिदुर्नीम स्रवणं जा
यते मनाक् ॥ नराधिपस्य जायेत कालाफलवृत्याकृतिः अकालमरणं नास्ति वैधव्यं नैव जायते ॥ का
लेकाले च वर्षन्ति जलदा अमृतं प्रभम् नेतयस्तस्य जायन्ते महोत्पातान्नचैव हि ॥ न तत्र जायते

२ मो. जानुदम्पत्योर्भेदपीडनम् सस्यानि वृद्धिमायान्ति समन्तात्तु फलं नृणाम्॥ महाभूतानि शुद्धानि दिव्य
द्विमलभास्करम् नागाः शान्तविषादृष्टा नाशयेको विद्रुतस्ययोनयः॥ आरण्यानि च सत्वानि त्यक्त्वा वैराणि सर्व
17 था कृतो बुद्धिमतां वैरं राष्ट्रेऽस्मिन्स्यात्सु राजके॥ इत्यमाध्यात्मिकाः पीडास्तथा याश्चाधिभौतिकाः
आधिदैविकनाम्न्यश्च निःशेषाः स्युरसंशयात्॥ सर्वे वर्णाः स्वधर्मस्थास्तथा वश्चतुराश्रमाः स्थिति
कार्नन्नृगी सर्वो जायते नात्र संशयः॥ अहो जगति कर्मणां फलमगण्यमत्यद्भुतं यदेष सकलैः समा
धिकरणैश्च नेत्रादिभिः समस्तमपि मण्डलं भुवश्चनः प्रभुस्त्यादयाप्रजाश्च परमादरात्सु रवदैनम
र्वन्ति च॥ अधिष्ठान्तर्यस्मिन्सुकृतभरिते शान्तमनसि स्थिते किं वाश्चर्यं सुकृतजनिरतायज्जनपदाः
स्थिते स्वस्य चित्ते परमविमलाह्लादभरिते न बाह्यान्तःस्वालीप्रकृतितरलाजानुचलति॥ नूनं चैष
विभुश्चराचरगुरुर्नाभिर्निबद्धादृढं त्रैलोक्यालयनिर्मितिस्थपतिना श्रीब्रह्मणा सादरम् यस्मि
न्सर्वत्तएवनेमयश्वासज्ञाः प्रजानामनाक्षीमां स्वां यतिलक्ष्मीं यान्ति विपदो दूरस्थुराकायेतः॥

तस्मात्संधार्यचित्तं निखिलजनहिता पुंसिनापार्थिवेन रत्यंसर्वात्मनेदं बहिरबहिरयोश्चैवसर्व
स्वसारम् सम्यग्यस्मिंस्तुगुप्तेप्रसरतियरितः सद्युपूर्वैजयन्तीपुष्टुद्वारवर्णाश्रमाणांनिश्चयनियमनी
पुण्यवेणीवरम्या ॥ सत्यांपूर्णचपताकायांसर्वतः प्रसरन्निधि जरीहर्षिप्रजाचित्तंकथंतांनाश्रये
द्बुधः ॥ स्वस्ववर्णाश्रमाचाररीतिरस्खलितायतः पूर्णप्रभीतिकथंधीरस्तत्रोपेहांसमाश्रयेत् ॥ इमे
चेद्गुणाश्रहापूर्वास्त्यज्ञसदूषितक्रियाः स्वस्वामिरक्षणायेवब्रजन्त्युत्तममार्गतः ॥ अन्तरात्माप्य
सौसाधुयत्नसंस्कारपरिपूतः सान्निध्यंयातितस्याहोयत्रनास्तिहृताहृतम् ॥ अनेनसहपूर्णका
विद्धतिर्नास्तीहभूतले सारंतत्परमेपुस्त्ययोसौवाङ्मनसातिगः ॥ सएषपरमात्मतंजगतिसर्व
थासर्वदापरार्थेचटनोद्यतोजयतियस्यसर्वेपिगुणः अनुग्रहलवास्पदंसकलसम्पदाम्बल्लभूर
सौभुविविराजतेनृपकुमारईश्वाप्रायः ॥ कियन्मतिचगण्यतेसकलभूधरव्यापकंयशोस्यसुभगो
हृतेर्विमलसत्त्वधीपालितः यदेतदखिलांमहीसकरुणांसमन्तादलंविभाव्यउरतेभ्रमंसच्चि

२· श्री· गजाङ्कमेवग्निनः ॥ अहो चित्रं चित्रं वत नवतमकल्पित्रमममले समन्तात्पूर्णेस्मिन्नुदधिजननया सापि कमला श्रि
18 यं मे च भूयासं रुचिरनयने कुण्डलधरं हरिं साध्वी पुत्रं तुरग उपविष्टं मृगयते ॥ अहो सा भुवनावली स्वरचि
तां प्रत्यग्रसंस्थोज्ज्वलां दृष्ट्वा चोन्मनाः यदा स्मरति नित्त्वत्कान्तं यानं बहिः निर्यान्तं यशसास्य सर्वसिति मा
दे पूज्य जाते क्रिया प्रत्याहृत्तमनाविनुद्यति चत्तामुग्धां श्रुतीनां जपात् ॥ जयति जयति वीरः कोप्यसौ
श्लाघ्यकीर्तिर्विकचकमललेत्रो धीविलासैकपात्रम् कलितविमलपुण्यैः सम्पदां पक्ष्मभूमिः परमम
हितसत्त्वोऽनर्घपूर्णश्रुधानाम् ॥ जातेनैतेन नितरां समलङ्कृता सा तानोमहोपपदराजपदाश्रिता
हूः पुत्रेण पुत्ररत्नेन जयन्तनाम्नाचन्द्रालवार्धिरिव वा मुदितैः सजीयात् ॥ तस्यास्य सम्पदुदयेन स
मं चिराय दीर्घायुरस्तु सुषमा च सुकीर्तिपूर्णा आरोग्यभाग्यनिचयो भिमतार्थसिद्धिर्बुद्धिश्च धर्मनिर
तानिखिलोपकर्त्री ॥ बुद्धिस्तत्त्वविवेचिनी तनुरियं कल्याणि चिरञ्जीविनी वाणी सत्यपरा धृतिः सुविमला
कीर्तिः प्रजाह्लादिनी हृद्योदार्यकलामलाचकमलाभक्तिर्महेशार्चनेह्लादिनिः शान्तिरथोरतिश्च

स ततं शास्त्रेस्य सञ्ज्ञायनाम् ॥ परोक्षप्रत्यक्षामरस्खलनवृत्तं यदनुगं यदाशुः श्रीकीर्तिद्रुविलजय
वृद्धेः सुवर्णम् विभूषेणामुत्राप्यमलमनसां यन्सुमनसां वरीवृत्ता स्वैचं तदिह परमाह्लादजनक
म् ॥ रतिमुखगत्ताकानृपीवृद्धं यास्तिनवापिया करणनलगास्या श्रीत्तस्निनेवीपुणिरः स्थिता गुरु
विपुतनूरत्नागृाा यास्थलीनचमेरवीजयतु नितरां सिंहो धीरत्याविसर्गभृत्ताननूः ॥ इत्येवमुक्तम
मलं परबोधहेतुर्वीक्षाय चित्तमलमार्जकमुक्तमाङ्गम् योगस्य पञ्चमिलयः पदमादधातितन
स्यामलागतिरमुत्रनचस्खलीति ॥ इति श्रीवीररत्नपुरवरशिखायां पञ्चरत्नं नवमम् ॥
श्रीगणेशाय नमः ॥ अथ पञ्चाङ्गितं द्वारं शृणु ध्रुवपालवृत्ताः यत्रप्रविष्टानां सर्वसिद्धियोग्या
दृकारणम् ॥ आबालं वृद्धपर्यन्तं प्रवेशाधिकृतानराः आद्यायां तिस्मृतिं यत्र द्वास्थेयं विनया
भिधा ॥ यद्यत्कार्यमनो चिन्तां गमयति ज्ञानवृत्तिं तस्मात् स्थापरजितिर्धिया विमलया प्रीत्या सदा
सर्वथा जैचिन्त्येन च वर्तनेरति रक्षोयासर्वये डास्पदं सेयं रीतिरुद्दीरिता ॥ नि वैरेनीभा २३

२· शो·

19

त्याख्यया ॥ अतो धीरा बुद्ध्वा विमृश्य नितरां रीतिममलां यदौचित्याद्वृत्तिः स्वपरविषया साधुफलदा यदा
श्रित्यापुंसां समुपनमति सम्पत्प्रवणता क एवैनं धीमान्स्पृशति वितथं नो स्वहितकृत् ॥ तस्मात्सर्वेन्द्रियग्राम
करी वृत्तिरस्यात्तु रूपं सम्यक्कीर्त्युज्ज्वलजयकरं साधनं साधुगीतम् सम्यक्कान्ते विषयिपटले नास्त्यसौ
कापि सिद्धिर्या धीमतां नाकरतलमलं याति नेच्छातएव ॥ तस्मात्तथा वर्जितनयं सुधीभिर्यत्नसत्क्रिया नहि
यतेयथा कार्यस्य पारं तत्र गम्यते पुनः ॥ सर्वथा लोकशोभेयं स्वपरोन्मानपालिता अन्योन्यमुत्तमाने
हितानर्थो जातु सम्भवेत् ॥ विनयेस्वात्मनातेहितं स्वतन्त्रिपरेयतः तथा चान्योन्यमानेन शोभासा
चापदं नृणाम् ॥ अतो विनयमाहात्म्यं यदाचरणतो नृणाम् नहीयते सदा ज्ञाच्या शोभा स्वपरगोच
रा ॥ सेयं शोभा स्वपरमं सारं मुनिभिरुच्यते यत्समाश्रयणान्मेरुः सारस्थाल्यो न कस्यचित् ॥ सेयं शोभा
स्वपरमं गौरवं मुनिसम्मतम् यत्समाश्रयणात्पृथ्वी गुरुत्वाल्यः कथं भवेत् ॥ सेयं शोभा स्वपरमं गा
म्भीर्यं धीरसम्मतम् यत्समाश्रयणादब्धिर्गम्भीरो दुस्तरोखिलैः ॥ सेयं शोभा श्रियां स्वा नृणां श्रियावि

नोयत्समाश्रयात् भस्मीभवन्ति झटितिदोषराशयो ह्यद्भुताः ॥ सेयं प्रभा भारविप्रभा यत्समाश्रय
णाद्बुधाः गाढान्धकारबुद्धितां जगतीं प्रोद्धरन्त्यलम् ॥ सेयं प्रभा प्रभावस्य यत्समाश्रयणाद्बुधैः
समन्तादमृतासिक्ता धरित्री क्रियते क्षणात् ॥ अत्रैवेयं प्रभा काचिद्दायति विमलावरणम् यदाश्रये
णसुखिनो भवन्तीह परत्र च ॥ सेयं खलु निरुपमा सद्गुणानां गरीयसी यदाश्रयेण निखिला गुणाः
स्वयमुपागताः ॥ तस्यास्त्वनेकधात्वेपि सारं चैवं विनेतृभिः वर्ण्यते यद्विलसेयं प्रभा भक्तिविनया
वली ॥ योसावचिन्त्यमहिमा परमामृतात्मा नन्दितद्भुतात्स्वयमनुग्रहणमाहृतायत् तस्मिन्प्रसन्न
उदियात्स्वयमेव कापि लोकोत्तरा जगति पुष्कलता बुधानाम् ॥ तथा हि परमामृतं स्वयं उग्र चिन्त्य
रूपो विभुर्यदीक्षणभरोल्लसत्स्फुरणमात्रमेतज्जगत् स एष परमेश्वरो नियतिशक्तिमाभास
यन्वशो तिविधिचोदनाश्रयनिषेधरूपाश्रपि ॥ तत्स्वभूतिरसौ य एष विभवस्फारो महाप्रभः
5.ठी. ल्लोकेश्वरेत निपुणं मनागपिनवास्पृष्टः स्वयम्भूर्विभुः सर्वज्ञः सकलार्थदोऽखिलजगत्कारीस्व

२·पू·

20

तन्वो मलः सर्वैष्णन इति प्रभाति सततं तन्निवृत्ताप्रश्रयः ॥ तन्वाभेरखिलात्मकादथपरा याभूतिर
जृम्भते स्वेच्छामात्रमवेहृत्य विश्वकलनां पूर्णां चतुर्धा स्थिताम् प्रोन्मुल्लसत्युरानतोऽथ चतुरो वेदाद्विज
न्यात्तु रान्पूर्णान्प्रास्थितवत्यसौ कलनया ध्याता यदेषा गतिः ॥ दुरधिगमतरा तस्माव सोऽचयद
नात्मकलार्घ्यप्रोक्ष्यीस्तान् मननमथ समाश्रितो ह्यधासीदमलमतीन्यदमूषुनिवृत्तासः ॥ मनु
ष्यास्तत्वाः परमविमलायेत्र विदितास्त्रिलोकीगोप्तारो रचितमिष्टतेयच्छिमपिभोः विदितायाभ्या
मन्नस्तदखिलमपीप्सितमिदं निबध्यास्यां ध्येयं सततमपि वर्त्यैविनयिभिः ॥ स एष परमो न
योविनयउच्यते धीधनैरमी जगति विश्रुता इह हि तेपि यद्गुन्धनः श्रितेत्र परमादरात्तत्रपि
संश्रिताः स्युः स्वयं श्रितेष्टिकृतकाचलेन खलु सिद्ध्योद्धरतः ॥ वन्द्योर्चयस्य सखलु सर्वजगतां
यो सौकृ विभासको यस्मिन्सापि च वाप्नुराजति तरां प्रदुद्भावतीर्णो दिवः भेषज्यं नदसो मनुर्यदव
दृत्याज्ञं विनीतैः परं तन्मूर्तिस्त्रपरानि सर्गमधुरासा हृत्ता कुतेर्वीक्यतः ॥ तद्येने प्राक्तुतिवदततः

२०

सर्वथाप्युदितोयं बुद्ध्वाबुद्ध्वाचरितमतुलानद्वितीयः समोन्यः तस्मादस्मान्मुदितहृदयैर्धार्यमे
तत्समस्तं धृत्वा चर्यं यत उदयते तत्प्रसादः परात्तिः ॥ विनयः सोयमेवेह मनोज्ञो दृश्यते तराम्
सर्वेषामथ चातीव सर्वाधिकृति शालिनाम् ॥ तथाहि ते महात्मानो राजानो विनयाद्भुवि कृर्युगे
तागतं वेत्तमृत्याः सहचरैः सह ॥ दृष्ट्वातोस्य तथादृप्यास्तदधीनानतत्पथात् चालयन्निशि
रस्तेन सर्वकार्यं कृतं भवेत् ॥ सम्बद्धं च जगत्कार्यं सम्बद्धं यं त्रिलोक्यापि तस्यां सम्यक्स्थिता
यां चक्रुर्नेदं नावधिष्यते ॥ तथाहियादृशीयेन धृता वैनयिकी स्थितिः सम्यक्समुचितं रम्यं
भुङ्क्ते सोतादृशं फलम् ॥ बहवोपिहि सेवन्ते राजानममितात्प्रयम् केचिच्चफलिनस्तत्र विनयाद्धे
तुरुच्यते ॥ बहवोपि गुरूणामं नामं विद्यामुपासते केचिद्देवात्र चतुरा विन्यस्तत्र कारणम् ॥ त
स्माज्जगति नृणां या रहस्यानीतयोमलाः ताः स्वेष्टकामिताकाङ्क्षापूर्णतान्यामतं मम ॥ गु
णाचात्र रहस्येषु महामतिभिरीप्सितम् करामलकवद्येषां हृद्यादर्शे जगत्स्थितम् ॥ तथर्म

र॰ भू॰ कामं वा प्रकृतितरलं नार्थमपि वा प्रभोस्तज्ज्ञो याचे न च न च विमुक्तिं समुचिताम् । दृढं मे साहाय्यं वितनुत करणबु
३ त्रविनये यदासक्ता सर्वं जितमिह भवेन्मदृमतिभिः ॥ अनर्थं सर्वथा चेदमविनीतत्वमिष्यते वैमुख्यमीश्वरा
देतद्यतः सर्वापदोऽप्यतः ॥ तथा चान्यं साहाय्यं विनयस्य निदर्शितम् । सदाविनीतमाकाशमप्युज्ज्वलपदं
21 सदा ॥ ये च केचिन्महात्मानो देवगन्धर्वकिन्नराः विद्याधराद्यास्तेनेन तादृशं भुञ्जते पदम् ॥ स्वस्वौचित्येन
सर्वं ते विनयं वकु विस्तरम् । आश्रित्य रम्याः पदवीर्येयेष्वमुपभुञ्जते ॥ विशिष्टा खलु यानीति र्विनयः
सोऽभिधीयते पर्यायमात्रेण भेदेन येविनय एव वा ॥ तस्मान्नीतिफलं सर्वं चित्रेयं भुवनावली तथाहि
दृश्यते सम्यग्यथा सौविहितस्थितिः ॥ आश्रित्य नीतिमिह सोऽपि महोत्पलस्थः सम्यक् करोति विविधा
विधिरन्नसृष्टिम् लक्ष्मीकपोलमकरीर्विविधा मनोज्ञाः पश्यत्यतन्द्रितमहो खलु सोऽपि विष्णुः ॥ किं व
र्ण्यो महिमास्य साधुजनतानन्दप्रदानोद्यते वेदोक्ताखिलधर्मपालनमतिस्तत्पीडनोद्योगिनः संह
र्तुर्दनुजाधिपान्हृतमतीन्यः साम्प्रतं चाप्यहो भूविम्बं चरणाब्जरेणुभिरलं सम्भूषयत्यद्भुतम् ॥ ईशा

नः स च सर्वदेवमहितो गौरीपतिः शङ्करो भूतीशः सचराचरस्य जगतः कर्ता च संहारकः चित्रांजां
नियतिं नयतत्वशालः संस्थाप्य बहुधा जिनो जन्तोन्नद्भुगतुर्निरन्नरमुत्वोसक्तो भवत्संयमी ॥ नयतत्व
शालः श्रुतीः स खलु देवहृद्याधिपो विभाज्य विविधाः स्थितीरधिकृतांश्च राश्रिद्दिनम् गुरुं गुरुत्तरं धि
यास्तु चतुरं पुरोधाय तं विवेकनिरतोऽस्त्यलं प्रपूर्णमयाविस्थितो दानवान् ॥ इत्थं यस्य यथाविधोऽस्ति वि
भवो नीतेः फलं ते विदुस्तस्माद्यस्य नयेरतिः स चतुरायात्द्रक्षु भाजायते तादृङ्गीतिफलं बुधैर्नि
गदितं ब्रह्मादिकीटान्तगं सर्वनीतिवपुं विचार्य मतिमांस्तस्मात्सदा तां श्रयेत् ॥ आसीत्सको धिजन्तु
र्येनाहोऽस्तीयबुद्धिवैकल्यात् सम्प्राप्य कीस्योनिं चण्डालस्तेनौस्तु खं पतितम् ॥ अहो स्वबुद्धिवैक
ल्यान्मनुजाः पशुतां गताः ताड्यमानाः पुरो यान्ति नासासंप्रोतरज्जवः ॥ बुद्धिवैकल्यमाहात्म्या
द्दहो मलिनकर्मतः केचिद्विचेतना लोके स्थावरत्वमुपागताः ॥ केचिद्विमोहितधियः क्रूरकर्म
स्वभावतः सम्भूता भीमनरकोदरगह्वरपूरकाः ॥ बुद्धिं समाश्रित्य ततो मनीषी विचारये

र० पू० दृष्टमिमं मण्डलम् । यास्यात्म सत्तास्ति विमर्शशक्तिः प्रभोर्महेशस्य खलु सैव नीतिः ॥ इत्थं स्वीकृतायाः ख्यात्या
यमार्गैलपण्डितैः नीतिशक्तिः परं तेषामतत्त्वबुद्धिस्वरूपिणी ॥ स्वयं स्वातन्त्र्यशक्तिं तां स्वीकृत्य परमेश्व
22 रः श्रेयःपूर्णां शिक्षां तेषां प्रत्युत्र यत्नां स्थापितवानभूत् ॥ येनां समन्ववहन्ते ते त्रसम्यग्व्यवस्थिताः मनाक्प्र
च्यवने तस्याः क्षणात्ते स्युः पदच्युताः ॥ अस्तीदं पद्वीरम्यास्या ननतस्य महेशितुः तत्कृतिपाल
नात्प्रशक्ताकैर्नैर्धीरैर्गतज्वरम् ॥ तथाहि भुवने यास्मिन् सिद्धाराज्ञां द्वयी गतिः सोमसूर्यविभेदेन विन
यस्त त्रकारणम् ॥ सगरभगीरथजनकाः इक्ष्वाकोर्वंशधरणिभर्तृतां याताः संस्थाप्य कीर्त्तिममलां
मिह तेऽयमस्वः स्थिताः सुसानीतिः ॥ तथा यधियं विबुधाः प्रपूयतनीतिं च तस्य रघुसूनोः मुनि
भिः सार्धं भगवान्यया वतीर्णो भुवं प्रपुपे ॥ तत्कुशइति पुराभून्मेदिनीमण्डलेशः सुचरितनयना
लीकीर्तिसङ्क्रान्तलोकः विविदिवकलनदक्षं यं विचिन्त्यामरस्त्रीः अभिसिषिचुरखण्डप्रार्थनाः स्व
र्गलोके ॥ कथं वर्ण्या भूमा विरलमतिभिस्तस्य च यदा गर्हेयस्योद्भूतेरकलितनया वीर्यमहसः

स्वयंसश्रीनाथ्यो निखिलभुवनाद्यो मरगुरुर्वर्तीर्योवीभारं सकलमनयच्छून्यकलनाम् ॥ यस्मिन्नु
न्निरभूत्सुकीर्तिविमलो नैर्थन्दनो ज्ञानलः सच्छ्रेयो निधिरङ्कुवर्त्तिकमलो निर्धूतपाप्माङ्कुज्जः येनासौ
भुवि रोपिता सुविमला सत्कल्पवल्ली मुता यस्याः पञ्च सुता बभूवुरमला लोके फलानि ध्रुवम् ॥ य
स्मिन्सोपि बभूव रञ्जितप्रजः श्रीकार्तवीर्यो नृपो येनासौ स्वपुरो बुजार्धितभवो बद्धो विवद्रोषणः
सत्कीर्तिध्वजभूषितां वधरणिं हत्वा स्मृतिं लब्धवानार्चीकाद्यदुतोभवन्नृतमतिर्धीराच्युपत्यङ्क्
जः ॥ यत्राभूच्छुभ्राविदुरित्यमलधीराजा प्रजारञ्जनाद्यस्यासन्मदनेचतुर्द्ध्रामरुारत्नानि सत्रा
त्यदम् गाम्भीर्येण सरित्पतीरविरयो भासाधियागीष्पतिर्नीत्यादैत्यगुरुर्बलेन पवनो यो सा
वभूभूतले ॥ भीष्मः सोपि बभूव यत्र भगवान्नाम्भीर्यधृतो दधि बाल्याद्यो व्रतचार्ययोगुरवशः
हेषणाद्भिः पूलीगतिः योभक्तिप्ररतो विधायहृतवान्सन्न्यस्तसन्त्यं हरिं कालं चापि हृतपली
कम्भिवर्यः हेत्वेच्छयो ज्यानतम् ॥ धर्मन्यायतपस्समाधिसमता सत्यादिसीमा भुवः श्रीम

२·घ्रो·
23

त्कृष्णापदद्वन्द्वरेणुपूरणादेत्याटवीवक्रयः ते पश्चापि बभूवुरन्नरविदः उत्तीर्तपो मूर्तयो यत्राहो सुरपाद
पाद्रवफलं नीतेर्विदुस्तद्बुधाः ॥ उत्तरुत्तरजनीतिं बुद्धिनिष्ठां विधाय क्ष्मातलमिदमपूर्वाघानथ गाढं सुरारेः
उवसच उलरत्नं रञ्जिता पुण्यनाशः स्वपरजनकमात्रानवूकोभूत्कुमारः ॥ पीडांगाढामसहत विद्या
गन्त्यादिभिर्दृश्यमानो ध्यानवृद्धो गतश्चपरं ज्ञानसारा मनीषी तातं ज्ञानी कुलमपि तथा यो ध्रुवनाद्यः क्लि
ष्टाली तस्यैनावत्फलमविकलं नीतितत्वस्य बोध्यम् ॥ लोके सैव परं बुधा विजयते नीतिः समास्फाल
नाद्युस्याः सोऽपि गुरुर्दीर्घ्न नीति सुजानानास्याय मूर्तिं पराम् यद्धानेः कविरप्यसौ गतधृतिः स्वार्थाद्व
तः क्षिप्यकान्याजवेद्भ्रष्टपितः उत्तोधृतिमुत्थेभ्रष्टस्य नेनेरतः ॥ नीतिं समाश्रित्य विभीषणो विसृष्टा
स्ति राज्यं हरिणदावराणाम् सत्यक्तनीतो खलु रावणोऽपि चतुर्दशिरा यास कलङ्कलेखा ॥ आसाद्यापी
तृपदवीं मिथ्या उत्पथगामिनः भ्रष्टास्तस्मात्पदात्तूर्णं तस्मान्नामनुपालयेत् ॥ नहुष इति स राजा
प्राप्य स्वर्गाधिपत्यं हतमतिरवरुद्धो बोधहीनः खिलात्मा अभवदवनिपृष्ठे दुष्टहृण्डार्तो द्विजा

जितिर्निखिलकल्मषजपात्रं यद्विनीतैः फलं ततः ॥ इत्थं ये भुवि पार्थिवा भूतप्रजाः ख्याता नाद्ययेप्याहृतास्तेषां
न्नीतिभरान्समर्ज्य विविधान्भुक्त्वा च कामान्सुखम् सत्कीर्तिध्वजपालिनीं प्रभुतरां स्वस्तीर्थमास्फाल्य य
स्त्राप्रर्भुक्तिमलं फलं सुविमलं सन्नीतिवल्ल्या ध्रुवम् ॥ अस्ति विततगह्वरं दुरवबोधभावोर्मिजं महार्थमणि
गर्भितं विरलसत्त्वभीतिप्रदम् गभीरमतिभिर्हितैर्विहिततीर्थतीर्थमनाद्यप्रान्निनयपत्तनं जगति
केचिदधीप्रपालिनः ॥ आस्तां तावदियं पुराणधरणीप्रणानां कथामञ्जरी सन्त्येव कालमद्याधुनापि भुवनाधानेऽग्रणी
नवताः भूमीप्रारविसोमवंप्रामणयोयह्नाकुलग्रामतीसु स्याविस्मृत दिक्कुलाद्रिकलना साहसप्रवृत्तजनैः ॥
नत्रासैरधुवंप्ररत्नममलप्रतोमहेच्छोर्थिनां सत्कुलोपपदस्त्वहर्द्विजवराप्रकासैकभूधीरधीः ॥ यंश्रीपूर्वम
हत्वहेपपदंक राजानमाहुः प्रजाः सम्प्रत्येवनवेवाखिलेनवतरारीतिनिर्ह्रियद्राजते ॥ सगोलाभसिंहः परं
नीतिपात्रं मतीमण्डलेकेवलोस्तीतिधीर्मे यएकोरिमध्येसमन्तात्पपोस्वंविपन्नोहिनीतिस्तुयासैवनीतिः ॥
अस्तोधीमतां सत्त्वमेवातिपुंस्यं नभाजीहयेनात्रसम्पद्विपद्वा सान्योमतोमेयमेवात्रलोकेनदृग्यस्य

१.भ्रो. लाभेद्युयेवान्यथाभूत् ॥ तथाचात्र पुराणैकपूरणैरनुवर्णितम् सद्भिः संनीतिमाहात्म्यं यत्कृतेः परमादरः ॥
यत्खलु शोभनमूल्यं शोभनवेषु स्वदेवदानवनरैर्दैः लब्धुं तद्धि नयफलं मत्वेति बुधैः समाश्रयेद्विन
२५ यम् ॥ तथाचाख्यायिका मद्रदेशीयो राजाजिभूपतिः अभूदनर्थदोषघ्नो भास्वानिव सदोदितः ॥ रामके
शेन साकं स मैत्रीकेसरिणा दृढाम् व्यवस्थापितवान्येन रेजे भूमिरियं मुदा ॥ तयोर्मैत्री विरेजे सा वासव
ब्राजयोरिव जनाश्च भूवुर्मुदिताः सर्वोपद्रववर्जिताः ॥ ततो मैत्र्यां विवृद्धायां तौ नृपौ दृढसन्धये अन्यु
द्वाहवचोन्योन्यं चक्राते पुत्रकन्ययोः ॥ दृढसन्धौ तथा मैत्र्यां व्यत्ययेन तयोर्द्वयोः देशयोश्चापणि
काश्च ते व्यवहारं प्रचक्रिरे ॥ तत्सख्येन चेद्देशौ द्वौ तौ सम्पत्पात्रतां तथा ईयतुर्मुदिताः सर्वे यथास्था
वरजङ्गमाः ॥ यत्किञ्चिद्धनयोः कार्यं स्वल्पं बहु पि वा गतम् अन्योन्यमनुमोदनेन तत्साधितं सत्फ
लं ह्यभूत् ॥ अन्योन्यमनुमतं हित्वा न काचिद्धनयोः क्रिया वर्त्तते सर्वथा मैत्री निविडासीद्द्वयेन्तृण
म् ॥ अथोदिने च कस्मिंश्चिन्मिश्रेषः संनिदेशानम् रामकाधिपतिं सम्यग्विनयो हृष्टितं वचः ॥ स्वस्ति

मित्रप्रवरो भाविद्वांसो गुणैः सजातिभिः सत्त्रानाम्यधिरोनीचैर्विस्तत्रिंकुरुते विभो ॥ सत्कुर्यतां प्राग
कालेयं चर्यानो भोः श्रीरोमणे यथावसरमारब्धा क्रिया सत्यं विराजते ॥ काले विभाति निजरां क्रियास
द्भिर्निषेविता अतीतावसरा व्यर्थाधीमत्स्वप्यगपीडिता ॥ विभान्ति नितरां स्त्रीणां काले ल्पके लिविभ्र
माः महान्तोप्यन्यदासत्यं लज्जायै केवलं हिते ॥ सदसत्त्वनिमित्तं हि कालः केवलमीरितः सत्त
सत्काललतो भाति भात्यसत्त्वं स्वथानतः ॥ तदस्मात्सुहृद्याद्दृष्टिं विधायामृतवर्षीतलाम् निबद्धांस
त्कृपांश्लाघ्यामुद्दन्यय पुष्पभोद्यताम् ॥ यथानो जीवितं चैतो शोभते हृत्तसत्क्रियो रविप्रभेरवप्रभे
श्रस्म हृत्कजनुहृर्य ॥ कीर्तिपूर्वस्थितिं गुप्तामदीहजगतीतले जीवत्वं यद्रूपेनास्तिनत्स्थितिः
सर्वथापुत्रभा ॥ यस्येहपुत्रनामात्मा स्थितो धरणिमण्डले संस्थितो सौ विभान्युच्चैः संस्थितोपि
विधर्वपुत्रान् ॥ तत्तयामन्त्रणीयं तेयथयथप्रोक्ताववृष्णाहुतम् प्रतिग्रास्याद्यथास्वास्थ्यं वोभवीतित
5.45. रां चनौ ॥ सत्कृतोन्मोच्यातवत्तयानयोरुत्सवसत्क्रिया यथाभद्रामुदेस्माकं पूर्वापरविमुद्धिनः ॥

२.पु. स्वपुत्रार्थंमयैवचिन्त्याद्यजातंमनोरमम् यथापूर्वंदासीदासाढ्यंसज्जितंसपरिच्छदम् ॥ स्थितोऽस्मिसज्जो
भवत्यांतेमतिमाह्लादकारिणीम् प्रतीक्षिष्यामितांकेकांशिखीवप्रमदाशये ॥ इतिवृत्तान्तभरितंवृत्तंरोमा
25 धिपःसुधीः निशम्यमुदितोभूत्वाहसित्वोचेसभासदः ॥ अहोभाग्यमहोभाग्यंसञ्जातंभवतामाविर
म् स्थितिरस्यान्ववायस्यप्रीतयेकस्यनोभवेत् ॥ कृष्णत्रयप्रतीकाराच्छ्लाघ्योयंसर्ववैद्याकथा साधना
न्येवसज्जयन्तांक्रियतांचत्वरपणम् ॥ सुमुहूर्तमितिपौरपुत्रोत्सवणंविधीयताम् अन्तःपुरोचितमपि
क्रियतांकण्डनादिकम् ॥ प्रतिकर्मणिचैकान्तेकुमार्योयंनिधाप्यताम् इतिभृत्यान्समादिश्यदूतंस
त्कृत्यसत्तमैः स्वोचित्यागाधहृदयोलिलेखोचितमुत्तरम् ॥ भद्रंप्रणतिरस्माकंमूरीकार्यामतंचवः
मूर्ध्नि नोभाग्यतरुणाफलितंसद्विजाशिषा ॥ परंतुज्ञाप्यतेकिञ्चित्तन्निशम्यहृदास्वयम् अवधार्य
गतीर्स्थित्राभाव्यंस्वस्थेनमानदः ॥ कोपिविशेषस्त्वरिषण्णांसमानकरणेङ्गिनाम् विवेकदृष्टिर्मनु
जस्तद्धीनस्तुपशुःस्मृतः ॥ इयत्तंसमुपाश्रित्यविशेषंगतिभेदतः सर्वाधिकारीमनुजःकर्मह

पणतः पशुः ॥ पशोरप्यपवानीचो मनुजोयं विचारतः सकर्मतत्पथयत्यवदुग्धार्जनपरोपरः ॥
तस्माद्विद्वत्तं विरंधृत्वामत्तोसद्भक्तिहेतवे कोनसर्वोत्तमांभङ्गिं विवेचयतियत्नतः ॥ सचासौथ
द्दिदं किञ्चिद्द्रव्यजातं महीतले तत्स्वभावबलं कस्य मुदे स्यादमलात्मनः ॥ गतागतं विदधती
सर्वत्रापि वराङ्गना यथानकस्य वित्तत्वाद्द्रव्यसम्पत्तिरीदृशी ॥ नकार्यागणनाप्यत्र गतत्वर्यो
निश्चयाद्बुधैः मेधामेधाविनां सेयं तद्धीनोपि पशुः स्मृतः ॥ वज्रमस्य भवस्यैतद्विभूषासा
वपनं हृदयम् अज्ञातपरमार्थानां भूषणं भाति मोहतः ॥ विदितार्थैस्तु विद्वद्भिर्नोन्मादयं न च
जानुवै उन्मादे कुतः वाह्यो सुखगन्धोपि सिद्ध्यति ॥ यदेतत्समस्तं लोके भूषणत्वेन किञ्चन
सलोपः सर्वथा तस्य परमार्थमहामणेः ॥ नूनं ते भ्रष्टसर्वस्वा ये भूषणकृतादराः उन्मा
द्यन्तिकुतः स्वास्थ्यं कामविभ्रान्तचेतसाम् ॥ तन्मयायं स्वयं ज्ञो यत्नाद्विनयभूषितः सुधि
हितस्वयन्निद्राणां बाह्यभूषणसंस्क्रिया ॥ सर्वथा विनयानर्हमणिभूषणभूषितः विभाति

१.प्रो.

26

सुतरां लोके परिषत्सु कृतादरः ॥ न भाति मूढधीर्जातु मनीषिपरिषद्गतः अप्युपात्तलसद्भूषा
जुष्टसर्वाङ्गभागपि ॥ विनयानर्घसद्रत्नविभूषितकलेवरः अनलङ्कृतदेहोपि भाति सर्वमनीषि
षु ॥ विनयालङ्कृते पुंसि समीपस्थाः स्वयं किल ग्राममपीलद्गमाद्या ये निधयो मान्यतास्पदम् ॥
यत्किञ्चिद्भवजातं हि द्रव्यजातं विभूतिमत् अत्र पुण्येन पुरुषं भारीभूतं च व्ययि दुःखदम् ॥ भयं
चौराग्निराजभ्यो नाप्नोत्यपुण्यव्ययोपि वा तस्यास्य सर्वथा दुःखं इति स्तनजो नो विद्यताम् ॥ अभयं
नाप्नारुद्धितं सद्योपनतमेव च अभारं सुखदं कस्य मुदे न स्यादिदं धनम् ॥ यस्य नास्त्युपमालो
के निवृत्तिभयवर्जितः अपहार्यव्ययानर्घ्यश्लोकोयं रत्नसत्तमः ॥ इति संलिख्य लेख्यं तद्भूप्रा
र्थनया नृपः दत्तं तं मुद्रितः प्राक्तगत्कामोदयतं प्रभम् ॥ प्राज्ञे नु मतिप्रज्ञेय मिश्र स्वामीमु
दान्वितः भावं विबुध्य तस्यालोकविस्मयं परमागतः ॥ सत्यमेतद्दृष्टो तस्य गाम्भीर्यधृतिस
त्कृता मतिस्तस्येति दृष्टो सो मुकुर्मुकुरत्वाचरत् ॥ सत्यं विनयनामेदं सर्वसम्पत्तिकारणम्

२६

२.पृ. पूर्वं वर्णाश्रमाचारः पूर्वेभ्योऽतिमहत्परम्॥ श्रुतिस्मृतिपुराणेषु यदुक्तं तद्विनयाभिधम्। पूर्वे
वं गङ्गेति मधुरं गङ्गेभ्यश्च समुदीरितम्॥ यस्यासौ विनयः सम्यक् तद्राज्यं तस्य स्थितं भवेत्। विन
97 याश्रयणाद्धीरैर्देवत्वं प्राप्यते ध्रुवम्॥ महद्भिर्दृश्यचिन्त्यतो नाश्रितान प्रवरत्वतः विनयाचा
रवन्तो ये ते नराः सुखभाजनम्॥ महत्त्वं यत्सुनामत्वं तदेतदिति निश्चितम्। तस्मादेष बुधैः
सम्यक्काल्योऽवहितबुद्धिभिः॥ इत्येवमुक्तं विनयाभिधानं रत्नं समुत्पृष्टं भुवि भूषणं यत्। यद्दा
दृत्ताः कीर्तिमिहाधिगम्य स्थानं परं यान्ति परत्र पुष्टाः॥ इति श्रीरत्नपुरवरश्मिलतायां विन
यरत्नं दशमम्॥ समाप्तोऽयं प्रथमः खण्डः॥

२३

शेखरत्नरूपिणीम् विज्ञप्तिं कुरुते यस्तु तस्य सा फलिनी भवेत् ॥ तस्मादेष
98 यमिदं बुध्यै नियमतः सत्याश्रुतिः सादृढं वादृढा जगतीतले प्रभुप
रो लोकः प्रभुस्तत्परः चेत्स्यात्तां न हि तत्र कापि प्रभवेत्त्वीदृक् ति चेत्तस्य
चिद्धीरित्थं स प्रभुः प्रजासु मुदिताः कल्याणपात्रं सदा ॥ दीनोत्तिमाश्रि
तवती भुवनावलीयं यस्यास्ति तं प्रभुमनर्घविलासशीलम् योऽभ्यर्च
येत्स ईहृद्दुर्लभमोदलक्ष्मीमप्यश्नुते किमुत सम्पदमैहिकीं च ॥ ॥
इति श्रीवीररत्नशेखरणिख्यायां देव्याः क्रन्दनरत्नं तृतीयम् ॥ ३ ॥ ॥